खादिर विवाह मन्त्राः

१.३.६. या आकृन्तन्नवयन् या अतन्वत याश्च देव्योऽन्तानभितो ततन्थ ।
तास्त्वा देव्यो जरसे संव्ययन्त्वायुष्मतीदं परिधत्व वासः ॥
परिधत्त धत्त वाससैनां शतायुर्षीं कृणुत दीर्घमायुः ।
शतं च जीव शरदः सुवर्चा वसूनिचार्ये विभृजासि जीवन् ॥
सोमोऽददत् गन्धर्वाय गन्धर्वोऽददत् अग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥
प्र मे पतियानः पन्थाः कल्पताँ शिवा अरिष्टा पतिलोकं गमेयम् ॥
प्रास्याः पतियानः पन्थाः कल्पताँ शिवा अरिष्टा पतिलोकं गम्याः ॥
१.३.११. अग्निरेतु प्रथमो देवताभ्यः सोऽसै प्रजां मुञ्चातु मृत्युपाशात् ।
तदयँ राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा ॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु ।
अशून्योपस्थ जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा ॥
द्यौस्ते पृष्ठं रक्षतु वायुरूरु अश्विनौ च । स्तनन्धयस्ते पुत्रान् सविताभिरक्षतु ।
आ वाससः परिधानत् बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् स्वाहा ॥
मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।
मा त्वँ रुदत्युर आ बधिष्ठा जीवपत्नी पतिलोके विराज
पश्यन्ती प्रजां सुमनस्यमानां स्वाहा ॥
अप्रजस्यम् पौत्रमर्त्यं पाप्मानमुत वा अघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशँ स्वाहा ॥
परैतु मृत्युरमृतं म आगाद् वैवस्वतो नो अभयं कृणोतु ।
परं मृत्यो अनुपमेहि पन्थां यत्र नो अन्य इतरो देवयानात् ॥
चक्षुस्मते शृण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोत वीरान् स्वाहा ॥
१.३.१९. इममश्मानारोहाश्मेव त्वं स्थिरा भव ।
द्विषन्तमप बाधदस्व मा च त्वं द्विषतामधः ॥
१.३.२२. इयं नार्यूपब्रूतेऽग्नौ लाजानापवन्ती ।
दीर्घायुरस्तु मे पतिः शतं वर्षाणि जीवतु ।
एधन्ताम् ज्ञातयो मम स्वाहा ॥

१.३.२३. अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुतः स्वाहा ॥
पूषाणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो पूषा प्रेतो मुञ्चातु मामुतः स्वाहा ॥
१.३.२४. कन्यला पितृभ्यः पतिलोक मयतीयमप दीक्षामयष्ट ।
कन्या उत त्वया वयं धारा उदन्या इवातिगहेमहि द्विषः ॥
१.३.२६. एकं इषे विष्णुस्त्वा नयतु । द्वे ऊर्जे विष्णुस्त्वा नयतु । त्रीणि व्रताय विष्णुस्त्वा नयतु । चत्वारि मायोभवाय विष्णुस्त्वा नयतु । पञ्च पशुभ्यो विष्णुस्त्वा नयतु । षड्रायस्पोषाय विष्णुस्त्वा नयतु । सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु । सखा सप्तपदी भव सख्यं ते गमेयँ सख्यं ते मा योषाः सख्यं ते मा योष्ठाः ॥
१.३.२७. सुमङ्गलीरियं वधूरिमाँ समेत पश्यत ।
सौभाग्यमस्यै दत्तवायाथास्थं विपरेतन ॥
सुकिँशुकं शल्मलिं विश्वरूपं सुवर्णवर्णँ सुकृतँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य नाभिँ स्योनं पत्ये वहतुं कृणुष्व ॥
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः ॥
१.३.३०. समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ ॥
१.३.३१. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदिष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
अघोरचक्षुरपतिघ्नि एधि शिवा पशुभ्यः सुमनः सुवर्चः ।
वीरसर्जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वार्यमा ।
अदुर्मङ्गलीः पतिलोक माविश शं नो भव द्विपदे शं चतुष्पदे ॥
इमां त्वमिन्द्र मीढ्वः सुपुत्राँ सुभगां कृधि ।
दशास्यां पुत्राना धेहि पतिमेकदशां कुरु ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
मम व्रते ते हृदयं दधातु मम चित्तमनु चित्तं ते अस्तु ।

मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥
१.४.३. रेखासन्धिषु पक्ष्मस्वावर्तेषु च यानि ते ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥
केशेषु यच्च पापकमीक्षिते रुदिते च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥
शिले च यच्च पापकं भाषिते हसिते च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥
आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत् ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥
ऊर्वोरुपस्थे जङ्घयोः संधानेषु च यानि ते ।
तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॥
यानि कानि च घोराणि सर्वाङ्गेषु तवाभवन् ।
पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमम् ॥
१.४.६. ध्रुवा द्योर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुले इयम् ॥
१.४.१०. अन्नपाशेन मणिना प्राणसूत्रेन पश्निना ।
बध्नामि सत्यग्रन्थिना मनश्च हृदयं च ते ॥
यदेतधृदयं तव तदस्तु हृदयं मम ।
यदिदं हृदयं मम तदस्तु हृदयं तव ॥
अन्नं प्राणस्य पड्विँशस्तेन बध्नामि त्वासौ ।
१.४.११. सुकिँशुकं शल्मलिं विश्वरूपं सुवर्णवर्णँ सुकृतँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य नाभिँ स्योनं पत्ये वहतुं कृणुष्व ॥
मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः ॥
इह गावः प्रजायध्वमिहाश्वा इह पूरूषाः ।
इहो सहस्रदक्षिणोऽपि पूषा निषीदतु ॥
इह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व ।
मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमस्व ॥
१.४.१२. अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि

। यास्याः पापी लक्ष्मिस्तामस्या अपजहि ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः पतिघ्नी तनूस्तामस्या अपजहि ॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपुत्र्या तनूस्तामस्या अपजहि ॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपशव्या तनूस्तमस्या अपजहि ॥ अग्निवायुचन्द्रसूर्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयाः स्थ । ब्राह्मणो वो नाथकाम उपधावामि । यास्याः पापिलक्षीर्या पतिघ्निया पुत्र्या या पशव्या तामस्या अपहत ॥

१.४.१५. विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिँशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥